# Shiva Lingashtakam Lyrics

ब्रह्ममुरारि सुरार्चित लिङ्गं
निर्मलभासित शोभित लिङ्गम् ।
जन्मज दुःख विनाशक लिङ्गं
तत्-प्रणमामि सदाशिव लिङ्गम् ॥ १ ॥
Brahma Muraari Surarchita Lingam
Nirmala Bhaashita Sobhitha Lingam
Janmaja Dhukha Vinaasaha Lingam
Tatpranamaami Sadaashiva Lingam || 1

देवमुनि प्रवरार्चित लिङ्गं
कामदहन करुणाकर लिङ्गम् ।
रावण दर्प विनाशन लिङ्गं
तत्-प्रणमामि सदाशिव लिङ्गम् ॥ २ ॥
Devamuni Pravaraarchita Lingam
Kaama Dahana Karunaakara Lingam
Ravana Darpa Vinaasaha Lingam
Tatpranamaami Sadaashiva Lingam || 2

सर्व सुगन्ध सुलेपित लिङ्गं
बुद्धि विवर्धन कारण लिङ्गम् ।
सिद्ध सुरासुर वन्दित लिङ्गं
तत्-प्रणमामि सदाशिव लिङ्गम् ॥ ३ ॥
Sarva Sugandha Sulepitha Lingam
Buddhi Vivaardhana Kaarana Lingam
Siddha Suraasura Vandhitha Lingam
Tatpranamaami Sadaashiva Lingam || 3

कनक महामणि भूषित लिङ्गं
फणिपति वेष्टित शोभित लिङ्गम् ।
दक्ष सुयज्ञ निनाशन लिङ्गं
तत्-प्रणमामि सदाशिव लिङ्गम् ॥ ४ ॥
Kanaga Mahaamani Bhooshitha Lingam
Panipati Veshthitha Sobitha Lingam
Daksha Suyajna Vinaasana Lingam
Tatpranamaami Sadaashiva Lingam || 4

eAstroHelp
Your Astrology Helpline

**कुङ्कुम चन्दन लेपित लिङ्गं**
**पङ्कज हार सुशोभित लिङ्गम् ।**
**सञ्चित पाप विनाशन लिङ्गं**
**तत्-प्रणमामि सदाशिव लिङ्गम् ॥ ५ ॥**
Kunkuma Chandhana Lehpitha Lingam
Pankaja Haara Susobhitha Lingam
Sanchitha Paapa Vinaashana Lingam
Tatpranamaami Sadaashiva Lingam || 5

**देवगणार्चित सेवित लिङ्गं**
**भावै-र्भक्तिभिरेव च लिङ्गम् ।**
**दिनकर कोटि प्रभाकर लिङ्गं**
**तत्-प्रणमामि सदाशिव लिङ्गम् ॥ ६ ॥**
Deva Ganaarchita Sevitha Lingam
Bhavair Bhakhi Bhirevacha Lingam
Dinakara Koti Prabhaakara Lingam
Tatpranamaami Sadaashiva Lingam || 6

**अष्टदलोपरिवेष्टित लिङ्गं**
**सर्वसमुद्भव कारण लिङ्गम् ।**
**अष्टदरिद्र विनाशन लिङ्गं**
**तत्-प्रणमामि सदाशिव लिङ्गम् ॥ ७ ॥**
Ahshta Dalopari Veshthitha Lingam
Sarva Samudbhava Kaarana Lingam
Ahshta Daridra Vinaasana Lingam
Tatpranamaami Sadaashiva Lingam || 7

**सुरगुरु सुरवर पूजित लिङ्गं**
**सुरवन पुष्प सदार्चित लिङ्गम् ।**
**परात्परं परमात्मक लिङ्गं**
**तत्-प्रणमामि सदाशिव लिङ्गम् ॥८॥**
Suraguru Suravara Poojitha Lingam
Suravana Pushpa Sadarchitha Lingam
Paraath Param Paramatmaka Lingam
Tatpranamaami Sadaashiva Lingam || 8

eAstroHelp
Your Astrology Helpline

**लिङ्गाष्टकमिदं पुण्यं यः पठेश्शिव सन्निधौ ।**
**शिवलोकमवाप्नोति शिवेन सह मोदते ॥**

Lingashtaka Midam Punyam Yah Pathet Sivasannidhau
Sivaloka Mahaapnoti Sivehna Saha Modatheh ||



eAstroHelp
Your Astrology Helpline